**SET – 4**

**Series : SGN/C**

**कोड नं.**
**Code No. 22**

**रोल नं.**
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (Core)

*समय : होरात्रयम्* | *पूर्णाङ्का: : **100***
*निर्धारित समय : 3 घंटे* | *अधिकतम अंक : **100***
*Time allowed : **3** hours* | *Maximum Marks : **100***

**निर्देशा** *:*

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*
*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*
*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे* **चत्वार:** *खण्डा: सन्ति ।*
*इस प्रश्न-पत्र में* **चार** *खण्ड हैं ।*
*There are* ***four*** *sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्ड: क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन ) | **10 अङ्का:** |
| SECTION A | : | (Unseen Reading Comprehension) | |
| खण्ड: ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | **15 अङ्का:** |
| SECTION B | : | (Sanskrit Writing Skills) | |
| खण्ड: ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **30 अङ्का:** |
| SECTION C | : | (Applied Grammar) | |
| खण्ड: घ | : | भाग I – पठितांश – अवबोधनम् (पठितांश – अवबोधन) | **35 अङ्का:** |
| SECTION D | : | PART I – Reading Comprehension | |
| | | भाग II – सामान्य: संस्कृतसाहित्यपरिचय: (सामान्य संस्कृत साहित्य परिचय) | **10 अङ्का:** |
| | | PART II – General Introduction to Sanskrit Literature | |

## खण्ड: क (SECTION A) — 10 अङ्का:

### अपठितांश – अवबोधनम्
### अपठितांश – अवबोधन
### Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त - प्रश्नानाम् उत्तराणि संस्कृतेन लिखत :
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following passage and answer the given questions in Sanskrit :

**गद्यांश :**

अतिविशाले संस्कृतसाहित्ये द्वौ ग्रन्थौ अति-प्रसिद्धौ स्त: । एतौ स्त: – रामायणं महाभारतं च । अनयो: महर्षिवेदव्यासविरचितं महाभारतं महत्त्वपूर्णस्थानं सन्धारयति । एतत् न खलु संस्कृतसाहित्ये, अपितु विश्व साहित्येऽपि प्रमुखं स्थानं बिभर्ति । महाभारतस्य गणना उपजीव्यग्रन्थेषु क्रियते । उपजीव्यग्रन्था: ते भवन्ति, येभ्य: कथांशं गृहीत्वा विभिन्ना: कवय: नैकानि नाटकानि महाकाव्यानि च विरचयन्ति । महाकवि: कालिदास: महाभारतस्य शाकुन्तलोपाख्यानात् विश्वप्रसिद्धस्य अभिज्ञानशाकुन्तलस्य मूलकथानकं गृहीतवान् । महाकविना भासेनापि महाभारतात् बीजम् आदाय षड् नाटकानि विरचितानि ।

यद्यपि महाभारते प्रमुखरूपेण कौरवपाण्डवयोर्मध्ये संजातस्य युद्धस्य घटना वर्णितास्ति, परम् एतद्घटनाव्याजेन कवि: सन्दिशति यत् अन्यायार्जितं किमपि वस्तु धनं स्याद् राज्यं वा, अन्तत: बलाद् अधिग्रहीतारं जनं कुलं वा समूलं विनाशयति । अत एव वेदव्यास: स्पष्टं कथयति यद् अस्माकं प्रत्येकं कार्यं धर्मसम्मतं स्यात् धर्ममार्गस्य अनुसरणेन अर्थ: कामश्चेति द्वयं प्राप्तुं शक्यते ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत : **½ × 4 = 2**
एक शब्द में उत्तर दीजिए :
Answer in one word.
(i) महाभारतस्य लेखक: क: अस्ति ?
(ii) महाभारते कयोर्मध्ये संजातस्य युद्धस्य वर्णनमस्ति ?
(iii) महाकविना भासेन महाभारतमाधृत्य कति नाटकानि विरचितानि ?
(iv) महाभारतस्य गणना केषु ग्रन्थेषु क्रियते ?

(ब) पूर्णवाक्येनोत्तरत : **1 × 2 = 2**

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence.

(i) महाभारते कथाव्याजेन कवि: किं सन्दिशति ?

(ii) कालिदास: शाकुन्तलनाटकस्य मूलकथानकं कुत: गृहीतवान् ?

(स) यथानिर्देशमुत्तरत : **1 × 4 = 4**

निर्देशानुसार उत्तर दीजिए :

Answer as directed.

(i) 'संस्कृतसाहित्ये' इत्यस्य विशेषणं किम् ?

(ii) 'षड् नाटकानि विरचितानि' अत्र क्रियापदस्य कर्तृपदं किम् ?

(iii) 'पालनेन' इत्यस्य किं समानार्थकं पदमत्र प्रयुक्तम् ?

(iv) 'अन्यायार्जितम्' इत्यस्य विलोमपदं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.

## खण्ड: ख (SECTION B) **15 अङ्का:**

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत रचनात्मक कार्य

### Sanskrit Writing Skills

2. भवान् नचिकेता: । भवतां छात्रावासे विद्युदापूर्ति: समुचिता नास्तीति विषये विद्युत्संस्थानं प्रतिलिखिते पत्रे रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दै: पूरयित्वा उत्तर-पुस्तिकायां पत्रं पुन: लिखत : **½ × 10 = 5**

आप नचिकेता हैं । आप के छात्रावास में बिजली की आपूर्ति ठीक नहीं है । इस विषय में लिखे गए पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थानों की पूर्ति कर पत्र को उत्तर-पुस्तिका में पुन: लिखिए :

You are Nachiketa. There is no proper supply of electricity in your hostel. In this regard in an application fill in the blanks with the words given in the box & rewrite the same in the answer-book.

**पत्रम्**

गोदावरीछात्रावासत:

(i) ____________
व्यवस्थापकमहोदय:,
विद्युदापूर्तिकेन्द्रम्,
वाराणसी

विषय: – समुचिता (ii) ________

मान्या: ।

सविनयं (iii) ________ यत् अस्माकं (iv) ________ परीक्षा आगामिमार्चमासस्य (v) ________ प्रारप्स्यते । अद्यत्वे दिनानि लघूनि (vi) ________ । अस्माभि: स्वकीयम् अध्ययनं (vii) ________ एव विधीयते । रात्रौ च विद्युत: आपूर्ति: अतीव (viii) ________ वर्तते, येन अस्माकम् (ix) ________ बाधितं भवति । कृपया रात्रिकाले विद्युत: आपूर्ति: सम्यक्प्रकारेण (x) ________, येन पठनं सुचारु स्यात् ।

इति सादरं निवेदयति,

भवदीय:
नचिकेता: ।
(अध्यक्ष:, छात्रपरिषत्)

**मञ्जूषा**

| |
|---|
| कर्तव्या, सेवायाम्, अध्ययनम्, विद्युदापूर्ति: अवरुद्धा, निवेद्यते, रात्रौ, वार्षिकी, प्रथमसप्ताहे, वर्तन्ते । |

3. मञ्जूषाप्रदत्तशब्दानां साहाय्येन अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत : **½ × 10 = 5**

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुन: लिखिए :

Fill in the blanks of the following short story with the help of the words given in the box below and rewrite the same.

**कथा** :

एकदा द्वे (i) ________ अजे नद्या: (ii) ________ गन्तुं तटात् इतस्तत: (iii) ________ स्म, परं (iv) ________ सेतु: (v) ________ आसीत् । तदा द्वाभ्यां चिन्तितं यत् क: उपाय: कर्तव्य:, येन (vi) ________ सुचारु स्यात् । तदैव ते (vii) ________ अचिन्तयताम् यद् आवयो: (viii) ________ सेतौ तिष्ठेत् (ix) ________ च तस्या: उपरि पादौ क्षिप्त्वा गच्छेत्, तर्हि नदीपारगमनं भविष्यति । ताभ्यां तथैव कृतम्, तयो: (x) ________ च सम्यक् अभवत् ।

**मञ्जूषा**

| |
|---|
| नदीपारगमनम्, बुद्धिमत्यौ, द्वितीया, पारम्, एका, नद्याम्, युगपत्, लघ्वायत:, आवयो:, भ्रमत: । |

4. मञ्जूषायां प्रदत्तपदानां साहाय्येन **पञ्चभिः** संस्कृतवाक्यैः मम भारतम् इति विषयमधिकृत्य वर्णनं कुरुत : **1 × 5 = 5**

मञ्जूषा में दिए गए पदों की सहायता से **पाँच** संस्कृत वाक्यों में मम भारतम् का वर्णन कीजिए :

With the help of the words given in the box describe मम भारतम् in **five** sentences in Sanskrit.

**मञ्जूषा**

| |
|---|
| अनेकसंस्कृतियुतम्, विशालाः नद्यः, पर्वतमालाः, विभिन्नाः ऋतवः, फल-पुष्पादि-वैविध्यम्, अरण्यानि, पशवः, हिमाच्छादिताः, सदानीराः, समुद्रतटम्, दर्शनीयस्थानानि, मन्दिराणि, तीर्थस्थानानि । |

## खण्डः ग (SECTION C) **30 अङ्काः**

### अनुप्रयुक्तव्याकरणम्
### अनुप्रयुक्त व्याकरण
### Applied Grammar

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धिविच्छेद कीजिए :

Disjoin Sandhis in the underlined words of the following sentences :

(i) विद्यमाना गतिः येषाम् <u>अन्यत्रापि</u> सुखावहा ।

(ii) <u>जीवत्यनाथः</u> अपि वने विसर्जितः ।

(iii) किं लद्दाखशब्दस्य <u>विशिष्टोऽर्थः</u> ?

(iv) दुर्गं <u>पथस्तत्</u> ।

(v) <u>गेहान्निष्क्रान्तस्य</u> ।

(vi) <u>परैरपि</u> कृतम् ।

(vii) <u>लोभश्चेद्</u> ।

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहाः लेखनीयाः : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह लिखिए :

Expound the underlined words of the following sentences.

(i) येनाक्रमन्ति ऋषयो हि <u>आप्तकामाः</u> ।

(ii) हितान्न यः संशृणुते स <u>किंप्रभुः</u> ।

(iii) सर्वे <u>यथास्थानम्</u> उपविशन्ति ।

(iv) रतिं कुर्वते <u>सर्वसम्पदः</u> ।

(v) दुराराध्या हि <u>राजलक्ष्मीः</u> ।

(vi) अयमेव <u>अहोरात्रं</u> जनयति ।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गत - प्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत : **1 × 8 = 8**

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दी गई प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets :

(i) अयं ह्रद: न अस्माभि: _______ (अनु + इष् + क्त) ।

(ii) _______ (पिशुन + तल्) यद्यस्ति ।

(iii) अत्र _______ (सम् + आ + गम् + क्त्वा) मत्स्यसंक्षयं करिष्यन्ति ।

(iv) प्रयोजनं _______ (ज्ञा + तुमुन्) न इच्छामि ।

(v) अहमदनगरे _______ स्तम्भा: राजन्ते । (कम्प् + शानच्) ।

(vi) इदम् अभियानं _______ आसीत् । (साहस + ठक्)

(vii) एष प्रकाश: भगवत: _______ । (मरीचिमाला + इनि)

(viii) गुरो: आज्ञा _______ । (पाल् + अनीयर्)

8. अधोलिखितवाक्येषु कर्तृक्रियापदयो: अन्विति: क्रियताम् : **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए :

Write the suitable verbs according to the subject in the following sentences :

(i) बालुका भूमिम् आवृणुत:/आवृणोति ।

(ii) अहं केवलं वक्ष्यामि/वक्ष्याम: ।

(iii) धवला: गिरय: शोभते/शोभन्ते ।

(iv) किम् एतत्सर्वम् अस्माकं गेहे अस्ति/असि ?

(v) उच्चैः विहस्य यद्भविष्य: उवाच/ऊचु: ।

**अथवा/OR**

अधोलिखितेषु वाक्येषु विशेष्यै: सह मञ्जूषाया: विशेषणपदानि योजयत :

निम्नलिखित वाक्यों में मञ्जूषा से विशेष्य के अनुसार विशेषण जोड़िए :

Write the appropriate adjectives from the box with their qualifying nouns in the following sentences :

(i) क्षुरस्य धारा ______ दुरत्यया ।

(ii) ______ समये राष्ट्रचिन्ता गरीयसी ।

(iii) ______ मत्स्या: प्रतिवसन्ति ।

(iv) अत्र ______ समिद्भि: जीर्णा: भित्तय: ।

(v) स्तूप: रात्रौ ______ आलोकं वितरति ।

**मञ्जूषा**

| भव्यम्, शुष्यमाणैः, निशिता, त्रय:, अस्मिन् । |
|---|

9. अधोलिखितवाक्येषु कोष्ठकपदैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत : **1 × 5 = 5**

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks using appropriate case-endings with the words given in the brackets in the following sentences :

(i) अहं (पारावत) समं यत्र तत्र गच्छामि ।

(ii) अलं भवत: (सन्ताप) ।

(iii) (परिश्रम) विना सफलता न लभ्यते ।

(iv) अद्भि: (गात्र) शुध्यन्ति ।

(v) (भवत्) यत् प्रतिभाति तत्कर्तव्यम् ।

## खण्ड: घ (SECTION D) **35 अङ्का:**

**भाग – I**

**PART – I**

**पठितांश – अवबोधनम्**

**पठितांश – अवबोधन**

**Reading Comprehension**

10. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत :

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, verse and drama passages and answer the questions based on them in Sanskrit :

(क) **गद्यांश:**

कस्मिंश्चित् जलाशये अनागतविधाता, प्रत्युत्पन्नमति:, यद्भविष्यश्चेति त्रयो मत्स्या: प्रतिवसन्ति स्म । अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भि: मत्स्यजीविभि: उक्तम् – अहो ! बहुमत्स्योऽयं ह्रद:, कदापि न अस्माभिः अन्वेषित: । अद्य तु आहारवृत्ति: संजाता । तत: प्रभाते अत्र आगन्तव्यम् इति निश्चय: ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) जलाशये कति मत्स्या: प्रतिवसन्ति स्म ?

(ii) मत्स्यजीविन: किं दृष्ट्वा प्रभाते आगमनाय चिन्तयन्ति ?

(ब) पूर्णवाक्येनोत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कस्यचिदेकस्य मत्स्यस्य नाम लिखत ।

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'गच्छद्भिः' इति कस्य पदस्य विशेषणम् ? ½

(ii) 'भोजनप्रबन्धः' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ? ½

(द) (i) 'प्रतिवसन्ति स्म' इति क्रियापदस्य किं कर्तृपदम् ? 1

(ii) 'युष्माभिः' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ? 1

(ख) **पद्यम्**

उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया ।
दुर्गं पथस्तत् कवयो वदन्ति ।।

**प्रश्ना** :

(अ) एकपदेनोत्तरत । ½ × 2 = 1

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) के तत् पथः दुर्गं वदन्ति ?

(ii) कान् प्राप्य निबोधत ?

(ब) पूर्णवाक्येनोत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

क्षुरस्य धारा कीदृशी भवति ?

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'दुःखेन गम्यम्' इत्यर्थे किं पदमत्र प्रयुक्तम् ? ½

(ii) 'वदन्ति' इति क्रियापदस्य किं कर्तृपदम् ? ½

(द) (i) 'छुरिका' इति स्थाने किं पदमत्र प्रयुक्तम् ? 1

(ii) 'त्यक्त्वा' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ? 1

(ग) **नाट्यांश** :

नटी – (प्रविश्य) आर्य ! इयमस्मि । आर्य ! दिष्ट्या खलु आगतोऽसि ।

सूत्रधार: – आर्ये । किम् अस्ति अस्माकं गेहे कोऽपि प्रातराश: ?

नटी – अस्ति, घृतं गुडं दधि तण्डुलाश्च सर्वम् अस्ति ।

सूत्रधार: – चिरं जीव, एवं शोभनानां भोजनानां दात्री भव ।
आर्ये! किम् एतत्सर्वम् अस्माकं गेहेऽस्ति ?

नटी – न हि, न हि, अन्तरापणे ।

सूत्रधार: – (सरोषम्) आ अनार्ये । एवं ते आशा छिद्यताम् । अहं पर्वताद् दूरमारोप्य पातितोऽस्मि ।

**प्रश्ना**:

(अ) एकपदेनोत्तरत । **½ × 2 = 1**
एक शब्द में उत्तर दीजिए ।
Answer in one word.
(i) सर्वे भोज्यपदार्था: कुत्र आसन् ?
(ii) प्रातराशस्य विषये क: पृच्छति ?

(ब) पूर्णवाक्येनोत्तरत । **1**
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence.
गेहे प्रातराशरूपेण किम् किम् अस्ति ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए :
Answer as directed.
(i) 'अस्मि' इति क्रियापदस्य कर्तृपदं किम् ? ½
(ii) 'शोभनानाम्' इति पदस्य विशेष्यं किम् ? ½

(द) (i) 'आर्ये' इतिपदस्य किं विलोमपदमत्र प्रयुक्तम् ? **1**
(ii) 'गिरे:' इति पदस्य किं पर्यायपदमत्र प्रयुक्तम् ? **1**

11. यथानिर्देशं प्रश्न**<u>द्वयम्</u>** उत्तरत । **2 × 2 = 4**
निर्देशानुसार <u>दोनों</u> प्रश्नों के उत्तर दीजिए :
Answer **both** the questions as directed.
(i) 'सूर्य एव प्रकृते: आधार:' इति पाठस्य सन्दर्भग्रन्थ: क: ।
(ii) 'न निष्प्रयोजनं प्रभुभि: आहूयन्ते अधिकारिण:' इति क: कं प्रति कथयति ?

12. प्रत्येकम् अंशस्य प्रदत्त-भावार्थ**<u>त्रयात्</u>** शुद्धं भावार्थं चित्वा लिखत : **2 × 2 = 4**
प्रत्येक अंश के लिए दिए गए **<u>तीन</u>** भावार्थों में से शुद्ध भावार्थ का चयन करके लिखिए :
Pick out and write the correct **<u>one</u>** out of the **<u>three</u>** explanations given for each of the following lines :

(अ) 'मन: सत्येन शुध्यति ।'
**भावार्था**:
(i) मनसा सत्यस्य आचरणं करणीयम् ।
(ii) य: सत्यं वदति स शुद्ध: भवति ।
(iii) यदि मनुष्य: सत्याचरणं करोति,
तदा तस्य मन: अपि पवित्रं भवति ।

(ब) 'सत्यमेव जयति, नानृतम् ।'

**भावार्थाः**

(i) सर्वदा सत्यं वद ।

(ii) सर्वदा सत्यस्य एव जयः भवति, असत्यस्य न ।

(iii) सत्यम् अमृतसदृशं भवति ।

**अथवा / OR**

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत : **1 × 4 = 4**

निम्नलिखित पद्य के भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए :

Complete the central idea of the given verse with the words given in the box and rewrite the same.

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ।।

**भावार्थः**

सज्जनानां गृहेषु अतिथीनां कृते (i) ______, वासाय स्थानम् (ii) ______ , मधुरवाण्या (iii) ______ इति भावानाम् कदापि (iv) ______ न भवति । ते सर्वदा अतिथि–सत्काराय तत्पराः भवन्ति ।

**मञ्जूषा**

| |
|---|
| अभावः, जलम्, आसनम्, सत्कारः । |

13. अधोलिखितस्य श्लोक**द्वयस्य** अन्वययोः मञ्जूषातः पदैः रिक्तस्थानानि पूरयित्वा अन्वयं पुनः लिखत । ½ × **8** = **4**

निम्नलिखित दो श्लोकों के अन्वयों में मञ्जूषा के पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुनः लिखिए :

The prose order renderings of the following **two** verses have been given below. Fill in the blanks from the words given in the box and rewrite the same.

(अ) **पद्यम् –**

जम्बूवृक्षस्य प्राग्वाल्मीको यदि भवेत् समीपस्थः ।
तस्माद् दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ।।

**अन्वयः –**

______ यदि जम्बूवृक्षस्य (1) ______ समीपस्थः (2) ______ भवेत् तस्माद् (3) ______ पुरुषद्वये सलिलं (4) ______ (भवति) ।

(ब) **पद्यम् –**

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

**अन्वयः –**

यः तु (1) ______ भूतानि आत्मानि एव (2) ______ सर्वभूतेषु च (3) ______ ततः न (4) ______ ।

**मञ्जूषा**

| |
|---|
| विजुगुप्सते, प्राक्, आत्मानम्, वाल्मीकः, अनुपश्यति,<br>दक्षिणपार्श्वे, सर्वाणि, स्वादु । |

14. अधोलिखितानां **'क'** – स्तम्भस्य वाक्यांशानां **'ख'** – स्तम्भस्य वाक्यांशै: सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुन: लिखत : **1 × 4 = 4**

निम्नलिखित **'क'** स्तम्भ के वाक्यांशों का **'ख'** स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुनः लिखिए :

Match the following sentences of the column **'क'** with the suitable sentences of column **'ख'** and rewrite the same.

| | **(क)** | | **(ख)** |
|---|---|---|---|
| (i) | अरक्षितं तिष्ठति दैवरक्षितम् | (अ) | प्रसिद्ध: प्राचीनश्च श्वेतस्तूप: । |
| (ii) | एष एव अङ्गीकरोति | (ब) | क्षणमप्यत्र अवस्थातुम् । |
| (iii) | एष: बौद्धधर्मस्य | (स) | सुरक्षितं दैवहतं विनश्यति । |
| (iv) | तन्न युक्तं साम्प्रतं | (द) | उत्तरं दक्षिणं चायनम् । |

15. अधोलिखितेषु वाक्येषु रेखाङ्किकतशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत : **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार सार्थक अर्थ चुनकर लिखिए :

Select and write the appropriate meanings of the underlined words in the following sentences :

(अ) "इदम् <u>अनुष्ठीयते</u> देवस्य शासनम् ।"

(i) प्रशस्यते

(ii) विधीयते

(iii) गम्यते ।

(ब) "मत्स्यजीविन: मत्स्य<u>संक्षयं</u> करिष्यन्ति ।"

(i) पालनम्

(ii) समृद्धिम्

(iii) विनाशम् ।

(स) "कुण्डलम् <u>आखण्डलदिश:</u> ।"

(i) पूर्वदिश:

(ii) पश्चिमदिश:

(iii) उत्तरदिश: ।

(द) "<u>परमेष्ठित:</u>" परार्द्धसंख्या ।

(i) विष्णो:

(ii) ब्रह्मण:

(iii) शिवस्य ।

## खण्ड: घ (SECTION D) 10 अङ्का:

**भाग – II**

**PART – II**

**सामान्य: संस्कृतसाहित्यपरिचय:**

**सामान्य संस्कृत साहित्य परिचय**

**General Introduction to Sanskrit Literature**

16. (अ) अधोलिखितेषु कस्य अपि **एकस्य** संक्षिप्त: परिचय: पञ्चभि: वाक्यै: संस्कृतेन लेख्य: : **1 × 5 = 5**

निम्नलिखित में से किसी **एक** का संक्षिप्त परिचय पाँच वाक्यों में संस्कृत में लिखिए :

Write a brief note on any **one** of the following in five sentences in Sanskrit :

भास:, भारवि:, कालिदास: ।

**अथवा / OR**

अधोलिखितेषु मञ्जूषापदसाहाय्येन रिक्तस्थानानि पूरयित्वा पुन: लिखत : **½ × 10 = 5**

निम्नलिखित में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुन: लिखिए :

Fill in the blanks in the following using the words from the box and rewrite the same.

(i) सर्गबन्धरचना ______ उच्यते ।

(ii) आदिकाव्यं रामायणं ______ विभक्तम् अस्ति ।

(iii) नाटकस्य ______ नान्दी भवति ।

(iv) बृहद्विमानशास्त्रस्य लेखक: ______ अस्ति ।

(v) गद्यकाव्यानां विधाद्वयम् अस्ति कथा ______ च ।

(vi) चारुदत्तम् इति ग्रन्थस्य लेखक: ______ अस्ति ।

(vii) नाटकेषु वृद्ध सेवक: ______ कथ्यते ।

(viii) प्रकरणे ______ अङ्का: भवन्ति ।

(ix) ______ वैदिकसाहित्यस्य प्रथमो ग्रन्थ: ।

(x) पञ्चतन्त्रस्य गणना ______ क्रियते ।

**मञ्जूषा**

| |
|---|
| नीतिकथासाहित्ये, महाकाव्यम्, ऋग्वेद:, सप्तकाण्डेषु, दश, प्रारम्भे, भास:, महर्षिभारद्वाज:, आख्यायिका, कञ्चुकी । |

(ब) संस्कृतमहाकाव्यस्य का: अपि पञ्च विशेषता: संस्कृतेन लिखत : **1 × 5 = 5**

संस्कृत महाकाव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए :

Write any **five** characteristics of the Sanskrit Mahakavya.

---